त्रयाणामपि दोषाणां तस्य रूपाणि लक्षयेत् ॥
व्याधिभ्यो दारुणश्चैव वज्रशस्त्राग्निसन्निभः ।
केवलोच्छ्वासपरमस्तब्धाङ्गस्तब्धलोचनः ॥
त्रिरात्रोपरमे तस्य जन्तोर्हरति जीवितम् ।
तदवस्थन्तु तं दृष्ट्वा मूढो व्याहरते जनः ॥
धर्षितो राक्षसैर्न्यूनमर्यमायां चरन्ति ये ।
अथवा ब्रुवते केचित् यक्षिण्या ब्रह्मराक्षसैः ॥
पिशाचैर्गुह्यकैर्वापि तथान्यैर्मस्तके हतम् ।
कुलदेवार्चनाहीनं धर्षितं कुलदैवतैः ॥
नक्षत्रपीडासपरे गरकर्म्मेति चापरे ।
सन्निपातमिमं प्राहुर्भिषजः कूटपाकलम् ॥"७॥
अथ प्रवृद्धमध्यहीनवातादिजनितसन्निपातज्वराणां लक्षणान्याह ।
"प्रवृद्धमध्यहीनैस्तु वातपित्तकफैश्च यः ।
तेन रोगास्त एवोक्ता यथादोषबलाश्रयाः ॥
प्रलापायाससम्मोहकम्पमूर्च्छारतिभ्रमाः ।
एकपक्षाभिघातश्च तत्राप्येतद्विशेषतः ।
एष सम्मोहको नाम्ना सन्निपातः सुदारुणः ॥"
रोगास्त एवोक्ता उक्ता एव ते रोगाः व्यथावेपथुनिद्रानाशविष्टम्भादयो वातजाः । दाहतृष्णोष्णता स्वेदादयः पित्तजाः । गौरवाग्निमान्द्योत्क्लासिका मुखप्रसेकादयः कफजाः । तत्रापि प्रलापादयः पक्षाघातान्ता विशेषाद्भवन्ति ॥ * ॥ ननु वातः प्रवृद्धः सन् ज्वरं करिष्यति पित्तन्तु मध्यं सममिति यावत् तत् कथं ज्वरं करिष्यति । यत आह ।
"धातवस्तन्मला दोषा नाशयन्त्यसमास्तनुम् ।
समाः सुखाय विज्ञेया बलायोपचयाय च ॥"
इति ।
उच्यते । अत्र पित्तं मध्यमपि अप्रकृतमेव यतोऽप्रकृतयोर्वातश्लेष्मणोरपेक्षया मध्यं तेन मध्यं मध्यकुपितमित्यर्थः ॥ * ॥ ननु कफः क्षीणः स कथं ज्वरं करिष्यति हीनशक्तिकत्वात् । उच्यते । दोषाः क्षीणा अपि व्याधीन् कुर्व्वन्त्येव । यत आह ।
"वातक्षयेऽल्पचेष्टत्वं मन्दवाक्त्वं विसंज्ञता ।
पित्तक्षयेऽधिकश्लेष्मा वह्निर्मन्दः प्रभाक्षयः ॥
शिथिलाः सन्धयो मूर्च्छा रौक्ष्यं दाहो कफक्षयः ॥"
इत्याशङ्का सिद्धान्तश्चापरत्रापि ॥ ८ ॥ * ॥
"मध्यप्रवृद्धहीनैस्तु वातपित्तकफैश्च यः ।
तेन रोगास्त एवोक्ता यथादोषबलाश्रयाः ॥
मोहप्रलापमूर्च्छाः स्युर्मन्यास्तम्भः शिरोग्रहः ॥
कासः श्वासो भ्रमस्तन्द्रा संज्ञानाशो हृदिग्रहः ॥
खेभ्यो रक्तं विसृजति तन्द्रा स्यात् स्तब्धनेत्रता ।
तत्राप्येते विशेषाः स्युर्मृत्युरर्व्वाक् त्रिवासरात् ।
भिषग्भिः सन्निपातोऽयं कथितः पाकलाभिधः ॥ ९ ॥
हीनप्रवृद्धमध्यैस्तु वातपित्तकफैश्च यः ।
तेन रोगास्त एवोक्ता यथादोषबलाश्रयाः ॥
हृदयं दह्यते चास्य यकृत्प्लीहान्त्रफुप्फुसाः ।
पच्यन्तेऽत्यर्थमूर्द्ध्वाधः पूयशोणितनिर्गमः ॥
शीर्णदन्तश्च मृत्युश्च तत्राप्येतद्विशेषतः ।
भिषग्भिः सन्निपातोऽयं याम्यनामा प्रकीर्त्तितः ॥ १० ॥ * ॥
अथ प्रवृद्धवातमध्यपित्तहीनकफस्य सन्निपातस्य लक्षणमाह ।
"प्रवृद्धमध्यहीनैस्तु वातपित्तकफैश्च यः ।
तेन रोगास्त एवोक्ता यथादोषाद्बलाश्रयाः ॥
प्रलापायाससंमोहकम्पमूर्च्छारतिभ्रमाः ।
मन्यास्तम्भेन मृत्युश्च तत्राप्येतद्विशेषतः ।
उक्तः क्रकचनामायं सन्निपातो भिषग्वरैः ॥ ११ ॥ * ॥
मध्यहीनप्रवृद्धैस्तु वातपित्तकफैश्च यः ।
तेन रोगास्तथैवोक्ता यथादोषबलाश्रयाः ॥
अन्तर्दाहो विशेषोऽत्र न च वक्तुं स शक्यते ।
रक्तमालक्तकेनेव लक्ष्यते मुखमण्डलम् ॥
यत्नेनाकर्षितः श्लेष्मा हृदयान्न प्रमिच्यते ।
इषुणेवाहतं पार्श्वं तुद्यन्ते खन्यते हृदि ॥
प्रमीलकश्वासहिक्का वर्द्धते तु दिनं दिनम् ।
जिह्वा दग्धा खरस्पर्शा गलः शूकैरिवाहतः ॥
विसर्गं नाभिजानाति कूजेच्चापि कपोतवत् ।
अतीवश्लेष्मणा पूर्णः शुष्कवक्त्रोष्ठतालुकः ॥
तन्द्रानिद्रातियोगार्त्तो हतवाग्निहतद्युतिः ।
न चातिलभते ग्लानिं विपरीतानि चेच्छति ॥
आयम्यते च बहुशो रक्तं ष्ठीवति चाल्पशः ।
एष कर्कटको नाम्ना सन्निपातः सुदारुणः ॥ १२ ॥ * ॥
हीनमध्यप्रवृद्धैस्तु वातपित्तकफैश्च यः ।
तेन रोगास्त एवोक्ता यथादोषबलाश्रयाः ॥
अल्पं शूलं कटीतोदो मध्यो दाहो रुजा भ्रमः
भृशं क्लमः शिरो वक्रमन्या हृदयवाग्रुजः ॥
प्रमीलकः श्वासहिक्काकाशजाड्यविसंज्ञताः ।
प्रथमोत्पन्नमेतन्तु साधयन्ति कदाचन ॥
एतस्मिन् सन्निवृत्ते तु कर्णमूले सुदारुणा ।
पिड़का जायते जन्तोर्यया कृच्छ्रेण जीवति ॥
स वैदारिकसंज्ञोऽयं सन्निपातः सुदारुणः ।
त्रिरात्रोपरमे तस्य व्यर्थमौषधकल्पनम् ॥"१३॥
अथ तन्त्रान्तरे । वातोल्वणादीनां सन्निपातज्वरविशेषाणां त्रयोदशानां शीताङ्गादीनि त्रयोदश नामान्तराणि लक्षणान्तराणि चाह ।
"शीताङ्गस्त्रिमलोद्भवज्वरगणे तन्द्री प्रलापी ततो रक्तष्ठीवयिता च तत्र गणितः सम्भुग्ननेत्रस्तथा साभिन्यासकजिह्वकश्च कथितः प्राक्सन्धिगोऽथान्तको रुग्दाहः सहचित्तविभ्रम इह द्वौ कर्णकण्ठग्रहौ ॥"
तन्द्री तन्द्रिकः । प्रलापी प्रलापकः । रक्तष्ठीवयिता रक्तष्ठीवी । सम्भुग्ननेत्रा भुग्ननेत्रः । अभिन्यासकः अभिन्यासः । कर्णकण्ठग्रहौ कर्णग्रहः कर्णकः । कण्ठग्रहः कण्ठकुब्जकः ॥ * ॥
अथ तेषां प्रत्येकलक्षणानि ।
"हिमशिशिरशरीरः सन्निपातज्वरी यः
श्वसनकसनहिक्कामोहकम्पप्रलापैः ।
क्लमबहुकफतान्तर्दाहवम्यङ्गपीड़ा-
स्वरविकृतिभिरार्त्तः शीतगात्रः स उक्तः ॥१॥
तन्द्रातीव ततस्तृषातिसरणं श्वासोऽधिकः कासरुक्
सन्तप्तातितनुर्गले श्वयथुना सार्द्धञ्च कण्डूः कफः ।
सुश्यामा रसना क्लमः श्रवणयोर्म्मान्द्यञ्च दाहस्तथा
यत्र स्यात् स हि तन्द्रिको निगदितो दोषत्रयोत्थो ज्वरः ॥२॥
यत्र ज्वरे निखिलदोषनितान्तदोष-
जाते प्रलापबहुला सहसोत्थिताश्च ।
कम्पव्यथापतनदाहविसंज्ञताः स्यु-
र्नाम्ना प्रलापक इति प्रथितः पृथिव्याम् ॥३॥
निष्ठीवो रुधिरस्य रक्तसदृशं कृष्णं तनौ मण्डलं
लौहित्यं नयने तृषारुचिवमिश्वासातिसारभ्रमाः
आध्मानञ्च विसंज्ञता च तपनं हिक्काङ्गपीड़ा भृशं
रक्तष्ठीविनि सन्निपातजनिते लिङ्गं ज्वरे जायते ॥४॥
भृशं नयनरक्तताश्वसनकासतन्द्राभ्रमाः
प्रलापमदवेपथुश्रवणहानिमोहास्तथा ।
अदो निखिलदोषजे भवति यत्र लिङ्गं ज्वरे
पुरातनचिकित्सकैः स इह भुग्ननेत्रो मतः ॥५॥
दोषास्तीव्रतरा भवन्ति बलिनः सर्व्वेऽपि यत्र ज्वरे
मोहोऽतीव विचेष्टता विकलता श्वासो भृशं मूकता ।
दाहश्चिक्कणमाननञ्च दहनो मन्दो बलस्य क्षयः
सोऽभिन्यास इति प्रकीर्त्तित इह प्राज्ञैर्भिषग्भिः पुरा ॥६॥
त्रिदोषजनिते ज्वरे भवति यत्र जिह्वा भृशं
हता कठिनकण्टकैस्तदनु मूकता मूढ़ता ।
श्रुतिक्षतिबलक्षतो श्वसनकाससन्तापयः
पुरातनभिषग्वरास्तमिह जिह्वकं चक्षते ॥७॥
व्यथातिशयिता भवेच्छ्वयथुसंयुता सन्धिषु
प्रभूतकफता मुखे विगतनिद्रता कासरुक् ।
समस्तमिति कीर्त्तितं भवति लक्ष्म यत्र ज्वरे
त्रिदोषजनिते बुधैः स हि निगद्यते सन्धिगः ॥८॥
यस्मिन् लक्षणमेतदस्ति सकलैर्दोषैरुदीते ज्वरेऽजस्रं मूर्द्धविधूननं सकसनं सर्व्वाङ्गपीड़ाधिका ।
हिक्काश्वाससदाहमोहसहिता देहेऽतिसन्तप्तता
वैकल्यञ्च वृथावचांसि मुनिभिः सङ्कीर्त्तितः सोऽन्तकः ॥९॥
दाहोऽधिको भवति यत्र तृषा च तीव्रा
श्वासप्रलापविरुचिभ्रममोहपीड़ाः ।
मन्या हनुव्यथनकण्ठरुजा श्रमाश्च
रुग्दाहसंज्ञ उदितस्त्रिभवो ज्वरोऽयम् ॥१०॥
गायति नृत्यति हसति प्रलपति विकृतं निरीक्षते मुह्येत् ।
दाहव्यथाभयार्त्तो दोषत्रयचित्तविभ्रमो ज्वरवान् ॥११॥